શ્રી યશોવિજયજી
જૈન ગ્રંથમાળા
દાદાસાહેબ, ભાવનગર.
ફોન : ૦૨૭૮-૨૪૨૫૩૨૨
૩૦૦૪૮૫

...ijay Jain Granthmala

—...गरमुनिविरचित—

# ...द्रामलस्तोत्रम् ।

Yashovijay Jain Granthmala

संशोधक अने प्रकाशक

**संघवी अमृतलाल मोहनलाल**

**व्याकरणतीर्थ, वैयाकरणभूषण**

**भावनगर.**

विक्रम सं. १९९२    ज्ञानपंचमी.    वीर सं. २४६२

मुद्रकः शाह गुलाबचंद लल्लुभाइ
श्री महोदय प्रिन्टींग प्रेस, दाणापीठ-भावनगर.

Shree Sudharmaswami Gyanbhandar-Umara, Surat    www.umaragyanbhandar.com

आगमोद्धारक–तपागच्छाचार्य–श्रीमदानन्दसागरसूरिशिष्य–
जयसागरमुनिविरचितम् ।

# ॥ अथ श्री चन्द्रामलस्तोत्रम् ॥

[ महावीरस्तोत्रम् ]

( वसन्ततिलकावृत्तम् )

चन्द्रामलं सकलभद्रपदं नतेन्द्र–
चूडामणिद्युतिविचित्रनखांशुदृश्यम् ।
वन्देऽर्हतस्त्रिभुवनाभिमताभिकाम–
कल्पद्रुमायितमुपद्रुतविघ्नमङ्घ्रिम् ॥ १ ॥

जातोऽपि यः सुरगिरिं चलयाञ्चकार,
क्रीडाविधौ विजितवैकृतदेहदेवः ।
उद्यौवनोऽपि निभृतं व्रतमाबभार,
वार्ध्यैं वधूमधिजगाम च सिद्धिसंज्ञाम् ॥ २ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

भूतार्थवद्भिरभिनन्दनवर्णपूर्ण–
पद्यैः स्फुरत्सुभगबन्धगभीरभावैः ।
स्तोत्रैः स्तुतः शतमखप्रमुखैः सुरैर्यः,
स्तोष्ये जिनं तमहमन्तिमतीर्थनाथम् ॥ ३ ॥

वाचस्पतिः प्रथितवाग्विभवोऽपि नाथ !,
स्तोतुं क्षमः कथमनन्तगुणं भवन्तम् ।
किं वा जनो गणिततन्त्रविशारदोऽपि,
तारागणं गणयति स्वयमन्तरिक्षे ॥ ४ ॥

कुण्ठा मतिर्वचनशक्तिरपार्थगुर्वी,
नोपासना बुधजनस्य सुरद्रुतुल्या ।
यत्नस्तथापि तव संस्तवनाय नाथ !,
तद्दूरदुर्ललितसाहसराजधानी ॥ ५ ॥

युक्तं हि तत्सकलविश्वविदाऽप्यशक्या,
वक्तुं गुणास्तव जिनेश्वर ! जीवलोके ।
चित्रं पुनः श्रुतकलाविकलोऽपि सोऽहं,
स्तोत्रच्छलादतुलचापलमभ्युपैमि ॥ ६ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मन्दोऽसमीक्षितकृतिव्यसनाभिभूतो,
हास्यो ध्रुवं मतिमतां ननु सिद्धमेतत् ।
हास्यास्पदं यदि विभो ! स्वयमात्मनोऽह–
मन्यैः कृतं कृपणहास्यविलासदक्षैः ॥ ७ ॥

यस्मिन्नुदारमतयोऽपि बुधाः स्खलन्ति,
स्तोत्रे कथं स्फुरति तत्र जनोऽल्पबुद्धिः ।
स्वामिंस्तथापि मुखरीभवितास्मि यद्वा,
श्रद्धाग्रहः श्रुतवतामपि दुर्निवारः ॥ ८ ॥

मुग्धं हि मां गुणनिधे ! गुणकीर्त्तनाय,
भक्तिस्तव त्वरयते प्रतिबन्धवन्ध्यम् ।
स्वच्छन्दपूर्त्तिरथवा मम किं न लोके,
क्रीडागृहं मृदुधियो रचयन्ति बालाः ॥ ९ ॥

आस्तां प्रभावभवनं स्तवनं तवेश !,
नामाभिधानमपि पापमपाकरोति ।
दूरे सुधास्नपनमूर्ज्जितवीर्यमस्या,
बिन्दुस्त्रवोऽपि विषवेगविनाशहेतुः ॥ १० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

माहात्म्यमीश ! मुनिभिस्तव गीतमुच्चैः,
शुभ्रं यशः शुभनिधे ! विबुधाधिनाथैः ।
लोकोत्तरं चरितमग्रसरैः कवीनां,
गीयेत केन गरिमालय ! ते स्वरूपम् ॥ ११ ॥

सूर्याधिकं भुवनबोधकरप्रभावं,
चन्द्राधिकं सकलतापहरस्वरूपम् ।
इन्द्राधिकं प्रवररूपमनन्तनेत्रं,
विश्वाधिकातिशयमीश ! भजे भवन्तम् ॥१२॥

गम्भीरतामधिगतोऽपि भृतोऽपि रत्नैः,
क्षारं गुणं यदि वमेदपि निस्तरङ्गः ।
किं वा तथापि जगदीश ! जडाशयोऽसौ,
रत्नाकरस्तव भजेदुपमानभावम् ॥ १३ ॥

दोषाकरः कमलखण्डरतिप्रणाशी,
शश्वत्कलङ्कमलिनात्मविभाविभूतिः ।
क्षीणां कलां किल धरन् कथमभ्रलम्बी,
तारापतिस्तव तुलामलमभ्युपेतुम् ॥ १४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अस्तङ्गमी जलदराहुनिरोध्यधामा,
नित्यं नभोभ्रमणकृत् परुषांशुराशिः ।
भानुर्यदा भवति नाथ ! तवोपमानं,
तुल्यस्तदाऽस्तु कृपणोऽपि नृपाधिपेन ॥१५॥

विश्वत्रयाय वितरन्तमनन्तभूतिं,
दारिद्र्यदारणमुदाराधियां प्रधानम् ।
मन्ये भवन्तमवलोक्य भुवि स्फुरन्त-
मन्तर्दधुर्ध्रुवमधीश ! सुरद्रुमौघाः ॥ १६ ॥

दृष्टो भवान् भवभृतां भवमाभिनत्ति,
सम्यक् स्तुतः सकलमङ्गलमूलहेतुः ।
भक्त्यार्चितः सपदि सिद्धिसमागमाय,
किं किं न ते त्रिभुवनाभ्युदयाय देव ! ॥१७॥

आस्तां तवार्चनमचिन्त्यविभूतिभूमि-
मोंहाऽसनं सकृदपि श्रवणं गिरस्ते ।
चन्द्रस्तु तिष्ठतु सुधानिधिरिद्धधामा,
यच्चान्द्रिकाऽपि घनघर्महरा धरायाम् ॥ १८ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तिष्ठन्त्वनन्तमहिमानि महेश ! लोके,
त्वन्निर्वृतिप्रभृतिपुण्यपदान्यहानि ।
जन्मापि ते जिनपते ! जगदुत्सवाय,
सर्वं सतां भवति भद्रकरं हि वृत्तम् ॥ १९ ॥

भास्वान् दिवा तपति पद्मवनं प्रबोध्य,
रात्रिं विनोदयति कौमुदमोदमिन्दुः ।
नक्तंदिवा तपसि बोधयसे तमोघ्न–
न्नेकस्त्वमेव भगवन्नघहृज्जगन्ति ॥ २० ॥

त्वामाश्रितः सुरनराहृतसंनिधानं,
रक्तच्छदावलिरसौ विलसन्नशोकः ।
छत्रीभवन्मणिफणस्य फणीश्वरस्य,
शोभां विडम्बयति रत्ननिधिस्थितस्य ॥२१॥

व्याख्यासदस्तलमणीनाभिभूय मूर्ध्नि,
धत्ते पदं कथमसौ सुरपुष्पवर्षः ।
यद्वा पतन् जिन ! तवाङ्घ्रियुगे किलोच्चैः–
स्थानं शुचिः कलयति प्रतिवादशून्यम् ॥२२॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्याद्वादबोधनिपुणां निखिलाङ्गिवर्ग-
भाषात्मसात्परिणतां त्रिजगत्पुनानाम् ।
धन्यास्त्वनन्तगमभङ्गतरङ्गितां ते,
संसारमूलहरणीं गिरमापिबन्ति ॥ २३ ॥

स्थाने भवन्तमवनम्य यदूर्ध्वयानं,
व्यावर्त्तते कथमधः सुरचामरौघः ।
यद्वाऽभिगम्य भुवनेश्वरपादपद्म-
मन्यत्र को व्रजति नाथ ! वियोगभीरुः ॥२४॥

सिंहासने मणिविभोन्मिषिते निषण्णं,
त्वां वज्रिणो जिन ! जगत्प्रतिबोधयन्तम् ।
उन्नन्दयन्ति निनदैरुदयाद्रिमूर्ध्नि,
कोका दिवाकरमिवाऽऽस्मितपद्मखण्डम् ॥२५॥

विष्वग्घतेषु भवता जगतां तमस्सु,
ज्योतिष्मतामधिपतिर्विधुताभिमानः ।
प्राप्तस्तवानुचरभावमिवाविभाति,
भामण्डलं ललितरश्मिभराभिरामम् ॥२६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

धिग्धिग्धृतोऽसि निकृतोऽसि मृतोऽसि मन्द !
दृप्तोऽसि धृष्ट ! सति विश्वपतौ यदास्मिन् ।
इत्थं प्रतिक्षिपति दुन्दुभिरीश ! मोहं,
जाने नदन्नभसि नन्दितजीवलोकः ॥ २७ ॥

तापत्रयीं त्रिभुवनेऽपि मुने ! निहन्सी–
त्येतद्गुणप्रकटनाय गुणप्रियाभिः ।
मन्ये मृगाङ्कधवला ध्रियते तवोर्ध्वं,
छत्रत्रयी त्रिजगतामधिदेवताभिः ॥ २८ ॥

गोप्ता भवान् यदि विभो ! भुवनत्रयाणां,
गुप्तः कथं रजतहेममणित्रिसाल्या ।
गुप्तित्रयेण यदि वा ध्रुवमावृतो यो,
गोपायितुं जगदलं भगवन् ! स एव ॥ २९ ॥

चञ्चन्नखद्युतिजुषोः सुरपद्मपङ्क्ति–
व्याजाद्व्रजन्ति तव नाथ ! पदोरधस्तात् ।
पुण्ये विहारसमये न्यसनोपचार–
सञ्चारचारुविधयो निधयो नवापि ॥ ३० ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मार्त्तण्डमण्डलविडम्बनडम्बरेण,
तेजोव्रजेन विलसत् कृशितान्धकारम् ।
सर्वस्वभूतमिव तीर्थकृदिन्दिराया,
युष्मत्पुरः स्फुरति धर्मद ! धर्मचक्रम् ॥३१॥

भित्त्वा मरुत्पथमधिष्ठितमग्रशोभं,
दूरोच्छ्रितं चलपताकमनर्घ्यदण्डम् ।
इन्द्रध्वजं मुनिप ! मूर्त्तमुदीरयन्ति,
मार्गं शिवस्य सुधियस्तरुराजिरम्यम् ॥३२॥

एवंविधामधिकृतामधिगन्तुमीशो,
भूतिं त्वमेव भुवनत्रितयेऽपि नान्यः ।
सर्वाः पतन्ति सरितः शुचिरत्नराशौ,
रत्नाकरे न च कदाचन गोष्पदेऽपि ॥ ३३ ॥

निर्ग्रन्थतामुपगतोऽपि परां परात्मन् !,
त्वं प्रातिहार्यकमलां कथमाबिभर्षि ।
अस्याः स्वरूपमिदमेव यतः परत्र,
नाङ्घ्रीनतीत्य रमते यतिपुङ्गवानाम् ॥३४॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सांनिध्यतस्तव परस्परमङ्गभाजो,
वैरानुबन्धमवधूय सृजन्ति मैत्रीम् ।
प्रेमोध्धुरं मधुरबन्धुमधिक्षिपन्ति,
मोहं महेश ! किमहो ! विषमं द्विषन्तः ॥३५॥

क्रोधं विनाऽपि हतवानहितान्नितान्तं,
मुक्तिप्रियामभिभजन्नपि वीतरागः ।
त्वं रक्षसि त्रिभुवनं ननु निर्ममोऽपि,
विस्तारिविस्मयपदं जिन ! ते चरित्रम् ॥३६॥

आविर्भवन्नपि विभो ! भविहृत्सु येन,
रागोदकं तदपि शोषयसे कथं त्वम् ।
यद्वा क्षिणोति निजसंभवहेतुभूत–
मम्भोनिधेर्जलचयं वडवानलोऽपि ॥ ३७ ॥

दीपाङ्कुरादधिगुणः शुचिरत्नखण्डो,
रत्नाद्विधुर्विमलरश्मिवितानशोभी ।
सोमाद्रविस्तिमिरराशिविनाशितेजा–
स्तेजोनिधे ! त्वमसि सूर्यसहस्रजेता ॥ ३८ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आलिङ्गनं विदधते ध्रुवमन्तरङ्ग–
रागप्रबन्धमरुणाः प्रतिपादयन्तः ।
मन्ये मिथः परिपतत्प्रतिबिम्बयोगा–
न्नम्रेन्द्रमौलिमणयोऽङ्घ्रिनखाः पुनस्ते ॥३९॥

दृश्याविमौ तव मुनीन्द्र ! मरुत्पतेश्च,
सम्यक् समाहृतपरस्परसारवस्तू ।
अङ्घ्रिर्गलन्मुकुटमाल्यरजोविराजी,
चूडामणिश्च शुचिचुम्बितपादरेणुः ॥ ४० ॥

वागंशुभिर्जिन ! तमोभरमन्तरङ्गं,
भित्त्वा दधासि भविनां हृदये पदानि ।
सद्यस्तमोदलमलं सवितेव लोके,
पद्माकरोदरनिषक्तसहस्रपादः ॥ ४१ ॥

चित्रं न नाथ ! शिथिलादरिणो भवन्ति,
त्वद्दर्शनेऽपि दुरितौघहरे परे यत् ।
किं वा स्फुरत्करभरो रजनीचराणां,
दृग्गोचरो दिनकरः किल कौशिकानाम् ॥४२॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गण्डस्थलोद्गलदनर्गलदानगन्ध–
सम्पत्समाहृतमधुव्रतवृन्दमाल्ये ।
नागाधिपे ध्रुवमुदञ्चितचण्डशुण्डे,
दिव्याङ्कुशीभवति ते स्मृतनाममन्त्रः ॥४३॥

उत्क्षिप्तकेसरघटोत्कटभीमवक्त्रं,
क्रोधारुणेक्षणयुगक्षरदुष्णरश्मिम् ।
घोरोद्धतध्वनितविद्रुतवन्यसत्त्वं,
ध्याता हि ते लघुमृगीकुरुते मृगेन्द्रम् ॥४४॥

स्फूर्जत्स्फुलिङ्गगणपूर्णनभोग्रभागं,
भस्मीभवद्घनवनस्पतिवर्धमानम् ।
चञ्चत्तडित्तरलताराशिघौघमुग्रं,
दावानलं शमयति स्मरणाम्बुदस्ते ॥ ४५ ॥

भीष्माङ्गमञ्जनरुचिं चलचण्डजिह्वं,
ज्वालावलीपरिलसद्गरमुद्गिरन्तम् ।
अभ्यापतन्तमहिमाशु वशीकरोति,
त्वन्नामगारुडमधीश्वर ! पाठसिद्धम् ॥४६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नृत्यत्कबन्धकनभश्वरमुण्डमाले,
वर्षच्छरव्रजवहद्रुधिरौघरौद्रे ।
व्यक्तैकवीररससङ्गमरङ्गभूमौ,
युद्धे जयन्ति भवतः स्मरणेन धीराः ॥४७॥

वातोध्धते जलनिधौ स्फुटनक्रपङ्क्ता–
वावर्त्तगर्त्तपतनक्षतयानपात्राः ।
दिङ्मूढतामुपगतास्तव कीर्त्तनेन,
तीर्णापदो हि कलयन्त्यनुकूलकूलम् ॥४८॥

कुष्टक्षतक्षयभगन्दरदुष्टदेहाः,
प्रोद्यन्महोदरधरा मृतिमेषिणोऽपि ।
नामाक्षरस्मृतिसुधां तव ये पिबन्ति,
रूपश्रिया तनुभृतास्त्रिजगज्जयन्ति ॥ ४९ ॥

क्लिष्टाग्रवन्निगडरुध्धगतिप्रचारा,
व्यासञ्जितप्रखरशृङ्खलघृष्टगात्राः ।
उत्सृज्य बन्धनभवं भयमङ्गभाजः,
स्वस्थीभवन्ति हि भवन्तमनुस्मरन्तः ॥५०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दृष्टो भवान् समरसेन निजात्मभूम्या–
मार्द्रीबभूव हृदयं किल शूलपाणेः ।
प्लोषं गता कथमहो ! चिररूढमूला,
हिंसाबृहद्व्रततिरुच्छ्वसितो विवेकः ॥ ५१ ॥

पापात्मनोऽपि फणिनो भवदङ्घ्रिपद्म–
संस्पर्शनेन जिनपुङ्गव ! कौशिकस्य ।
मन्ये सुधात्वमगमद्विषमेव यत्स,
दिव्यश्रियामधिकृतोऽमृतभुग्बभूव ॥ ५२ ॥

यं प्राप्य वीर ! विकटं कटपूतनायाः,
शीतोपसर्गमघवर्गविडम्बितायाः ।
तेनैव तां विहितवानसि नष्टतापां,
धिष्णासु कौशलमहो ! भुवनोत्तराणाम् ॥५३॥

वर्षद्रजोव्रजगजोरगसिंहचक्रं,
यत्संगमेन विकृतं विबुधाधमेन ।
रोमापि ते मुनिपते ! चलितं न तेन,
वज्रोदरे व्रजति निष्फलतां शरौघः ॥ ५४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

गाम्भीर्यसागर ! सुराचलधीरमूर्त्ते !,
ध्यानक्षतिं तव विधातुमसौ प्रवृत्तः ।
स्वात्मानमेव कृतवान् गलितप्रतिज्ञः,
स्वर्गासनश्रुतमपाकृतभूतिसारम् ॥ ५५ ॥

उत्त्रासयन् सुरवधूव्रजमात्मरक्षा-
नाक्रोशयन् भयकृदाकृतिदुर्निरीक्ष्यः ।
संप्राप्य पादयुगलं तव योगिनाथ !,
दैत्येश्वरो हरिमधोवदनं चकार ॥ ५६ ॥

व्यावर्त्तनात्तव विभो ! वरमेव मन्ये,
श्लाघास्पदं रुदितमुन्मुखचन्दनायाः ।
बाष्पाविलां वसुमतीं प्रथमं चकार,
रत्नौघवृष्टिशुचिसंगवतीं द्वितीयम् ॥ ५७ ॥

तुल्यश्रमौ समबलावपि गोपवैद्यौ,
व्यक्तादरौ त्वयि विभो ! व्यवसायधीरौ ।
एको जगाम नरकं सुरलोकमन्यो,
व्याङोर्मिथोऽन्तरमहो गुरु राधिधातोः ॥५८॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त्वत्सन्निधेः प्रविगलन्मदकन्दबान्धि–
मिथ्योपलम्भनमलास्त्रिशलाकुमार ! ।
शुद्धोऽवधेरधिगमाच्छिवराजयोगी,
सङ्गः सतां सकलसंपदुदारभूमिः ॥ ५९ ॥

शिष्यब्रुवो भवत एव गतः प्रवृद्धिं,
विद्याश्रयोऽप्यजनि दुर्मदमन्दमेधः ।
मङ्खात्मजो हतविधिर्भवतो विरोधी,
व्याले विषं भवति वा पयसां प्रपानम् ॥६०॥

विद्युच्छतप्रतिनिधिं निधनाय लेश्यां,
यां तैजसीं त्वयि मुमोच मुमूर्षुरेषः ।
यातैनमेव हि नराधमसङ्गदुष्टा,
स्पृश्या कथं परमशुधिमुपागतानाम् ॥६१॥

मुक्तात्मनोऽपि भवतः परिदेवनेन,
यो गौतमः सपदि केवलमाससाद ।
इष्टग्रहे गुरुजनात् करुणं शिशूनां,
यद्रोदनं मृदुधियां प्रथमो ह्युपायः ॥ ६२ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

पुण्यात्मनां जिन ! भवन्मुखपूर्णचन्द्रं,
हित्वाऽन्यतो न रमते क्वचनापि दृष्टिः ।
गङ्गातरङ्गतरणोध्धुरबन्धुराणां,
किं वा रतिः करटिनां लघुनिर्झरेषु ॥ ६३ ॥

धन्यास्त एव शुचिपुण्यभरास्त एव,
श्लाघ्या जिनेन्द्र ! शशिगौरयशश्चयास्ते ।
तैरेव जृम्भितफलं निजजन्म चक्रे,
भक्तिप्रसादितहृदः प्रणमन्ति ये त्वाम् ॥६४॥

लब्ध्वाऽपि दुर्लभमिदं नरजन्म जानन्,
दुष्प्राप्यतां तव गिराममृतायितानाम् ।
भीतोऽपि जातिमृतिपातपरम्परायाः
को नाम नाभिरमते भवदङ्घ्रिमूले ॥ ६५ ॥

पूर्वं मया भववनभ्रमणाकुलेन,
नाकर्णितो न च नतो न विलोकितस्त्वम् ।
प्राप्तोऽधुना धुतरिपो ! कृपया तवैव,
शाखीव दुर्लभतरो मरुमण्डलोर्व्याम् ॥६६॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

त्वामन्तरा मुनिपते ! भववारिराशौ,
ये ये मयि व्यतिकरा विपदामभूवन् ।
वाचाऽपि तान् कथयितुं कथमीश्वरोऽहं,
जानासि वा स्वयमशेषमधीश्वर ! त्वम् ॥६७॥

मोहावृतं हृदयदारणदारुणाना-
माधारतां गतमनर्थपरम्पराणाम् ।
दुःखोदधेर्विधुरमुद्धर मामधीश !,
यस्माद्विभो ! त्रिभुवनावनतत्परोऽसि ॥६८॥

हा ! हा ! हतोऽस्मि हतभाग्यभरोऽस्मि नाथ !
यत्त्वद्गिरोऽपि विपराङ्मुखतां गतोऽस्मि !
किं वाऽन्यथा रचितरौद्रकदर्थनाना-
मर्थ्योऽहमूर्जितकषायभुजङ्गमानाम् ॥ ६९ ॥

जन्मावलीविषमवेषविवर्त्तनाभिः,
प्रेमप्रभृत्यभिनयैर्भवरङ्गभूमौ ।
मामानटन्तमिह मोहनटेन्द्रशास्त्या,
नोपेक्षितुं विवशमर्हसि विश्वबन्धो ! ॥७०॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

दीनाकृतिं हृतहृदं विधृतात्मवक्त्र–
दन्तार्पिताङ्गुलिमलं गलदुष्णबाष्पम् ।
आक्रन्दवृन्दमुखरं शरणागतं मां,
पाहि प्रभो ! भुवनवत्सल ! हे कृपालो ! ॥७१॥

हित्वा भवन्तमपि लोकहितावतारं,
कस्याग्रतः कृपणरोदनमातनोमि ।
रौमि स्वयं यदि परं करुणासमुद्र !,
बाष्पप्रमार्जनविधौ मम नात्र कोऽपि ॥७२॥

अन्यन्न वच्मि वचसा न च चिन्तयामि,
चित्तेन नाथ ! वपुषा न करोमि कृत्यम् ।
मुक्त्वा तव स्तवनचिन्तनवन्दनानि,
यज्जन्मनः फलमिदं विशदं वदन्ति ॥७३॥

पापं पिधेहि मयि धर्मधियं निधेहि,
बोधिं विधेहि हृदि धेहि शमं चिराय ।
एतावदेव भगवन् ! भवतस्तु याचे,
यद्याचनामनुमनन्ति महानुभावाः ॥ ७४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अस्मिन् प्रसीद विगुणेऽपि जने जिनेश !,
स्वामिन् ! जगच्छरण ! संहृतजन्मजाल !।
लोकंपृण ! प्रणतपावन ! मां कृपार्द्र !,
संपादय प्रतिभवं भवदेकनाथम् ॥ ७५ ॥

( शिखरिणीवृत्तम् )

अहो ! स्तोत्रद्वारा ध्रुवगतिगतोऽप्याशु भगवन् !,
समायातस्त्रातर्हृदयसदने मे त्वममलः ।
प्रभो ! याचे वाचा रचिततिमिरोच्छेदसुभगां,
चिरं कुर्या धुर्यामिह हि वसतिं जृम्भितजय ! ॥७६॥

( वसन्ततिलका )

श्रीविक्रमाद्गगननारदनन्दचन्द्रे ( १९९० ),
दर्भावतीस्थितवता जयसागरेण ।
स्तोत्रं प्रभोश्चरमतीर्थकृतः कृपाब्धे-
श्चन्द्रामलाभिधमिदं विदधे विशुध्यै ॥७७॥

॥ इत्यागमोद्धारक-तपागच्छाचार्य-श्रीमदानन्द-
सागरसूरिशिष्य-जयसागरेण विरचितं
श्रीचन्द्रामलस्तोत्रं संपूर्णम् ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

श्री यशोविजयजी जैन ग्रंथमाळा
ભાવનગર

प्राप्तिस्थानम्—

१ संघवी अमृतलाल मोहनलाल

C/o. घोघाना दरवाजे

भा व न ग र.

२ सलोत अमृतलाल अमरचंद

पा ली ता णा.

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com